# Premasayujyam

# પ્રેમસાયુજ્યમ્

## Document Information

Text title : Premasayujyam

File name : premasAyujyam.itx

Category : vishhnu, vAsudevanElayath, krishna

Location : doc_vishhnu

Description/comments : From Bhaktitarangini by Prof. P.C. Vasudevan Elayath

Latest update : December 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# પ્રેમસાયુજ્યમ્

કૃષ્ણે ગોકુલવાસમુજ્ઝિતવતિ પ્રોદ્યદ્વિયોગાકુલા
ગોપ્યસ્તત્સ્મરણામૃતૈકશરણા નિન્યુઃ સુદીર્ઘાઃ સમાઃ ।
પશ્ચાદેત્ય સમન્તપઞ્ચકમહાતીર્થે કદાચિત્ પ્રિયમ્ ।
દૃષ્ટ્વા તાઃ કિલકિઞ્ચિતાઞ્ચિતહૃદઃ કામપ્યવસ્થાં દધુઃ ॥ ૧॥

વિખ્યાતપ્રાભવોઽસૌ સકલમુનિનૃપારાધિતો નન્દસૂનુ-
ર્ગોપીસ્તા મન્દહાસપ્રસરસુમધુરં પૂર્વવન્માનયિત્વા ।
નીત્વા તાભિઃ સમેતઃ કતિપયદિવસાંસ્તત્ર તાભ્યો દદૌ તામ્ ।
શાન્તિં યોગીન્દ્રકામ્યામમૃતરસમયીં ભક્તિમાર્ગૈકગમ્યામ્ ॥ ૨॥

ખણ્ડઃ ૧

તત્ર ગોપિકાશતસમાવૃતં તરુતલે સ્થિતં શ્યામસુન્દરમ્ ।
ચક્ષુષા પિબન્ત્યાત્મના જગૌ દૂરસંસ્થિતા કાપિ ગોપિકા ॥ ૧॥

કથમિહાસ્મિ હા કથમિહાગતો મધુરદર્શનો નન્દનન્દનઃ ।
વિવિધભાવસમ્મર્દનિસ્સહં સ્ફુટતિ હા હરે મામકં મનઃ ॥ ૨॥

મૂકરાગિણીં માં પરીક્ષિતું વ્યતિકરોઽયમુત્પાદિતસ્ત્વયા ।
તૃપિતયા દૃશ ત્વાં પિબામ્યહં વર્ધતે વિભો, દ્વિગુણિતા તૃષા ॥ ૩॥

ધન્યજીવિતાસ્તે સખીજના યે હ્રયન્ત્રિતાસ્ત્વામુપાસતે ।
સહજમુગ્ધતાસન્નિયન્ત્રિતા હા! હતાઽસ્મ્યહં મન્દભાગિની ॥ ૪॥

પરિસમર્પયન્ત્યાત્મજીવિતં કિમુ પતામિ તે નાથ પાદયોઃ ।
કમપિ તે કરસ્પર્શમાપ્નુયાં શિરસિ મામકે શાન્તિદાયકમ્ ॥ ૫॥

અહહ! સાહસં સાહસં ત્ત્વિદં, મમ ન શોભનં ધૃષ્ટચેષ્ટિતમ્ ।
ક્વ ચ ભવાન્ વિભુર્વિશ્વપૂજિતઃ? ક્વ ચ વરાકિકા ગોપદારિકા?॥ ૬॥

ખણ્ડઃ ૨

અયિ પુરા હરે, યામુને તટે ભવદનુષ્ઠિતે ચેલવોરણે ।

તવ નિયોગતસ્ત્વામુપાગતા ગોપબાલિકાસ્તા દિગમ્બરઃ ॥ ૧॥

આગલં જલે સ્થિતવતીં તદા માં વિલોકયન્ દૂરતો ભવાન્ ।
સ્મિતમદાત્; પ્રભો સંસ્મરામ્યહં; સ્મરસિ કિં હરે, તાદૃશીમિમામ્?॥ ૨॥

વેણુગાનમાકર્ણ્ય તાવકં વિશ્વમોહનં વલ્લવીજનાઃ ।
ત્વામુપાયયુ; ર્દૂરતઃ સ્થિતા કેવલા ત્વહં ત્વાં વ્યલોકયમ્ ॥ ૩॥

વેણુનાલિકાચુમ્બિતાધરં ગોપિકાશતૈરાવૃતં મુદા ।
દૂરતોઽપિ મય્યર્પિતેક્ષણં સંસ્મરામિ તે તત્ સ્થિતં હરે! ॥ ૪॥

રાસખેલને નાહમાગતા કેવલં ગૃહે ધ્યાનમસ્થિતા ।
તન્વતી સુખં નર્તનં ત્વયા સાકમાન્તરે રાસમણ્ડપે ॥ ૫॥

નો કદાઽપિ માં નન્દનન્દનો જ્ઞાતવાનભિજ્ઞાતવાનપિ ।
નાસ્તિ તાદૃશં સૌભગં ચ મે નાસ્તિ ચાત્મનિ પ્રૌઢચાતુરી ॥ ૬॥

હા! કદાઽપિ તે સેવનોદ્યતા નાહમાગતા ત્વત્પદાન્તિકમ્ ।
ત્રાસવિહ્વલા લજ્જયાઽકુલા; માં કથં ભવાન્ સંસ્મરિષ્યતિ?॥ ૭॥

ખણ્ડઃ ૩

વ્રજનિવાસમુત્સૃજ્ય ગચ્છતસ્તવ રથઃ ક્ષણં મદ્ગૃહાન્તિકે ।
નિશ્ચલોઽભવ;ત્તત્ર ચાભવં સ્તભ્યસંશ્રિતાઽલિન્દસંસ્થિતા ॥ ૧॥

અભ્યષિઞ્ચદાહન્ત! માં પ્રભો સ્નિગ્ધયા દૃશા સસ્મિતં ભવાન્ ।
વિગલિતં તદા કેલિપઙ્કજં તવ કરામ્બુજા; ન્નવલોકયમ્ ॥ ૨॥

હા! ન્યશાભયં તે મુખં તદા વિધુરદર્શનં મ્લાનસુસ્મિતમ્ ।
મધુરવેદનાવિદ્યુદાહતા પ્રલયમાગતા કતિપયક્ષણાન્ ॥ ૩॥

સુમધુરં ભવન્નામ ગૃહ્ણતિ ત્વાં વિલોકયન્ત્યેવ સર્વતઃ ।
ત્વયિ મમ પ્રિયે લીનમાનસા વિરહવેદનાં નાવિદં ચિરમ્ ॥ ૪॥

અહહ! ભાવનાવઞ્ચિતાઽસ્મ્યહં; કૃષ્ણચેષ્ટિતં નૈવ મત્પરમ્ ।
વિલસિતં હરેઃ સહજમોહનં મુગ્ધયા મયા જ્ઞાતમન્યથા ॥ ૫॥

“ત્વાં સ્મરામ્યહં” - કિં ન્વિદં મયા શ્રૂયતે મદીયાન્તરાત્મનિ?।
મધુરભાષણં તાવકં હરે, જીવનામૃતં ખલુ પિબામ્યહમ્ ॥ ૬॥

શ્યામસુન્દર, ત્વાં વિલોકયે નિર્નિમેષકં દૂરતઃ સ્થિતા ।
મધુરદર્શનં મુગ્ધસુસ્મિતં મદનમોહનં મન્મનોહરમ્ ॥ ૭॥

અયિ મહાપ્રભો, ત્વાં વિલોકયન્ત્યધિગતાઽસ્મ્યહં પૂર્ણકામતામ્ ।
મમ હિ ચેતના હર્ષવિહ્વલા યાતુમિચ્છતીવોપગૂહિતુમ્ ॥ ૮॥

પ્રિય, દયામયી દૃષ્ટિરદ્ય તે નિપતતિ સ્વયં મય્યપિ ક્ષણમ્ ।
અમૃતધારયા સમ્પ્લુતાઽસ્મ્યહં સ્પન્દતેતરાં મામકં મનઃ ॥ ૯॥

હન્ત! માં પ્રતિ પ્રસ્થિતો ભવાન્ પ્રિયસખીઃ સમુત્સૃજ્ય ગોપિકાઃ ।
અભયમુદ્રયા સાન્ત્વયન્નિમાં દ્રુતપદં હરે, કિં સમેષ્યસિ? ॥ ૧૦॥

હા! સમાગતો મત્સમીપતઃ પ્રિયતમો ભવાન્ કૃષ્ણ, તિષ્ઠતિ ।
કિં પ્રભાષસે માં વરાકિકાં? સ્ફુરતિ તેઽધરં પલ્લવારુણમ્ ॥ ૧૧॥

“સખિ, જિતં ત્વયા; પ્રેમધામ તત્ પરમમદ્વયં પ્રાપ્તવત્યસિ”
ઇતિ ભવદ્ગિરં શાન્તિદાયિનીમમૃતવાહિનીં હા! પિબામ્યહમ્ ॥ ૧૨॥

સદયલોચને મધુરસુસ્મિતે તવ મુખામ્બુજે મત્પુરોગતે ।
ચિરમુપોષિતાં નિદધતી દૃશં નાથ, યામ્યહં નિત્યનિર્વૃતિમ્ ॥ ૧૩॥

રુદ્ધા વાગ્, દૃઢનિશ્ચલ સમભવદ્દૃષ્ટિઃ, પ્રસન્નં મુખં,
નિષ્પન્દં હૃદયં ચ; સા વ્રજવધૂઃ સંપ્રાપ ધન્યાં ગતિમ્ ॥ ૧૪॥

તેજો દેહસમુત્થિતં નિરુપમં તસ્યાઃ પુરઃસ્થે તદા ।
કૃષ્ણે લીનમભૂત્; સ ચાપિ ભગવાંસ્તસ્થૌ ક્ષણં નિશ્ચલઃ ॥ ૧૫॥

ઇતિ શ્રીવાસુદેવન્ એલયથેન વિરચિતં પ્રેમસાયુજ્યં સમ્પૂર્ણમ્ ।

---

*Premasayujyam*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*